श्रीमन्मधुसूदनसरस्वतीभिः

विरचिता

परमहंसप्रिया

नाम

श्रीमद्भागवताद्यपद्यव्याख्या

श्रीमन्मधुसूदनसरस्वतीभिः

विरचिता

परमहंसप्रिया

नाम

श्रीमद्भागवताद्यपद्यव्याख्या

स्वामिनीलकण्ठानन्दगिरिणा सम्पादिता

Copyright Information

Published by :

brahmachArI GYAnachaitanya
for
www.lalitaalaalitah.com

प्रकाशकः

www.lalitaalaalitah.com
– इति संस्थायै
ब्रह्मचारी ज्ञानचैतन्यः

प्रथममिदं संस्करणम्
कार्त्तिकपौर्णमासी , विक्रमसंवत्सरः २०६८

Publisher:

brahmachArI GYAnachaitanya
for
www.lalitaalaalitah.com

First Edition
10th November, 2011

श्रीगणेशाय नमः ।

प्रकाशकीय

नमाम्यभोगिपरिवारसम्पदं निरस्तभूतिमनुमार्धविग्रहम् ।
अनुग्रमुन्मृदितकाललाञ्छनं विना विनायकमपूर्वशङ्करम् ॥

श्रीमद्भागवत के प्रथम श्लोक **'जन्माद्यस्य यतः'** - के ऊपर विद्वत्शिरोमणि **मधुसूदनसरस्वती** जी ने **परमहंसप्रिया** नामक व्याख्या लिखी है । यह व्याख्या अद्वैत वेदान्त के संन्यासी जिज्ञासुओं के लिये विचारणीय है । इस ग्रन्थ में महावाक्य का विचार हुआ है ।

पूर्व में यह व्याख्या दो बार प्रकाशित हुई है । प्रथम – चौखम्बा के द्वारा , तथा द्वितीय ललितालालितः के द्वारा । चौखम्बा से प्रकाशित संस्करण अपरिष्कृत था । द्वितीय संस्करण डिजिटल था ।

उसी पर आधारित यह तीसरा संस्करण हमारे द्वारा प्रकाशित हो रहा है ।

प्रस्तुत संस्करण **ललितालालितः** के द्वारा मूलतः सम्पादित एवं संशोधित है ।

संन्यासी जिज्ञासुओं के अनायास बोध के लिये **स्वामी नीलकण्ठानन्द गिरि जी** के द्वारा पुनः सम्पादनपूर्वक विषयविभाग किया गया है तथा शीर्षक दिये गये हैं । इसलिये यह संस्करण साधकों के लिये एक सुन्दर अनुभव सिद्ध होगा । ऐसी मैं आशा करता हूँ ।

-

ब्रह्मचारी ज्ञानचैतन्यः ,

www.lalitaalaalitah.com

समर्पणम्

अर्पयेऽनेकरूपाय भक्तानां हितकाङ्क्षिणे ।
कृष्णाय व्यक्तरूपाय जगदाधारहेतवे ॥

किञ्चिद् निवेदनम्

इह खलु धर्मार्थकाममोक्षाणां मोक्षस्यैवात्यन्तिकदुःखनिवृत्तिपरमानन्दप्राप्तिरूपत्वेन परमपुरुषार्थत्वम् । **'मृत्योः स मृत्यमाप्नोति य इह नानेव पश्यति , द्वितीयाद्वै भयं भवति'** इत्यादिश्रुतेः भेददर्शनस्य संसारहेतुत्वेन , मोक्षो ब्रह्मात्मैक्यज्ञानादृतेऽशक्यसम्भवः । अतो मोक्षशास्त्रेषु ब्रह्मात्मैक्यं प्रतिपाद्यते ।

ब्रह्मात्मैक्यप्रतिपादकमोक्षशास्त्रलक्षणोपनिषदां व्याख्यानभूतमिदं श्रीमद्भागवतम् । पुराणशिरोमणेः श्रीमद्भागवतस्य -

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञस्स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥१॥

इत्याद्यश्लोकस्य व्यख्यानात्मिकेयं परमहंसप्रियाख्या टीका सर्वशास्त्रमहोदधिपारावारिणा श्रीमन्मधुसूदनसरस्वतीस्वामिना कृता । तेन टीकायामस्यामद्वैतवेदान्तमतानुसारेण व्याख्याकारि भक्तिरसावलम्बिपौराणिकादीनां विविधमतसंग्रहश्च । अखण्डाद्वयानन्दघने शुद्धे परमात्मनि ग्रन्थस्य तात्पर्यम् ।

ग्रन्थस्यास्य सम्पादनेऽध्येतॄणां सुखावबोधाय विषयविभागं कृत्वा तस्य च शीर्षकं दत्त्वा शङ्कासमाधानौ च विभज्य शङ्कासमाधानलक्षणमूलश्लोकोद्धृतवाक्यग्रन्थतत्कर्तृनामानि पृथ्वक्षरेण निर्दिष्टानि ।

सम्पादकः

प्रस्तावना

महर्षि वेदव्यास अपरपर्याय कृष्णद्वैपायन द्वारा रचित श्रीमद्भागवत से शायद कोई विरले ही अपरिचित हो। इसी श्रीमद्भागवत के प्रथमश्लोक का व्याख्यानात्मक परमहंसप्रिया नामक यह प्रस्तुत ग्रन्थ है।

वेद का विभाजन , अठारह पुराण और इतिहास लिखने के बाद भी जब महर्षि वेदव्यास को सन्तोष नहीं हुआ तो नारदजी के उपदेश के अनन्तर उन्हों ने श्रीमद्भागवत की रचना की।

श्रीमद्भागवत में वेदव्यास ने परमात्मा के स्वरूप का ही तटस्थलक्षण और स्वरूपलक्षण से निरुपण किया है । अतः सम्पूर्ण श्रीमद्भागवत का प्रतिपाद्य परमात्मा ही है । अज्ञात रूप से विषय भी वही प्रतिपाद्य परमात्मा और ज्ञात होने पर प्रयोजन भी वही प्रतिपाद्य परमात्मा ही है।

कृष्णद्वैपायन वेदव्यास जी ने सम्पूर्ण ग्रन्थ के प्रतिपाद्यको ग्रन्थके प्रथमश्लोक में ही इस कुशलता से प्रतिपादित कर दिया है कि अवशिष्ट ग्रन्थ उसी का विस्तार दिखायी देता है। अतः यह प्रथमश्लोक स्वयं में एक सम्पूर्ण ग्रन्थ है।

किन्तु आद्यश्लोक के उन रहस्यों को साधारणावगाहिनी बुद्धि समझ नहीं सकती। अतः उन रहस्यों को सुलझाने एवं समझाने के लिए वेदों के पारमार्थिक सिद्धान्त के रहस्य के ज्ञाता श्रीमन्मधुसूदनसरस्वती जी ने इस प्रस्तुत परमहंसप्रिया नामक टीका की रचना की। इस टीका में टीकाकार ने बहुत ही वैदुष्यपूर्ण ढंग से सम्पूर्ण अद्वैतवेदान्तसिद्धान्त को संक्षेपेण प्रतिपादन किया है।

प्रस्तुत सस्करण में पाठकों के पठन की सुविधा के लिये –

प्रत्येक विषय को विभक्त कर दिया गया है।

विभक्त प्रत्येक विषय के अनुरूप शीर्षक सम्पादक द्वारा दिये गये हैं ।

शंका और समाधानों को भी पृथक् पृथक् कर दिया गया है।

मूलग्रन्थोक्त पद , ग्रन्थ के नाम , ग्रन्थकार के नाम , लक्षण , शंका और समाधान मोटे अक्षरों मे दिये गये हैं। इत्यादि।

सम्पादकः

अनुक्रमणिका

श्रीमन्मधुसूदनसरस्वतीविरचिता

परमहंसप्रिया

मूलं - भागवतम्

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञस्स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥१॥

टीका - परमहंसप्रिया

मङ्गलम्

श्रीकृष्णं परमं तत्त्वं नत्वा तस्य प्रसादतः ।
श्रीभागवतपद्यानां कश्चिद्भावः प्रकाश्यते ॥१॥

ग्रन्थरचनाप्रयोजनकथनम्

अनुदिनमिदमायुस्सर्वदाऽसत्प्रसङ्गैः
बहुविधपरितापैः क्षीयते व्यर्थमेव ।
हरिचरितसुधाभिस्सिच्यमानं तदेतत्
क्षणमपि सफलं स्यादित्ययं मे श्रमोऽत्र ॥२॥

ग्रन्थतात्पर्यध्यानात्मकमङ्गलत्वं मूलस्य

कृत्स्नग्रन्थतात्पर्यविषयीभूतमर्थं दर्शयन्भगवान्बादरायणिस्तमेव ध्येयत्वेनोपशिक्षयन्मङ्गलमाचरति - **जन्माद्यस्येति** । तं **परं सत्यं धीमहीति** - सम्बन्धः ।

ब्रह्मस्वरूपलक्षणकथनम्

सत्यम् = अबाध्यम् ।

तत् किंस्विद्व्यवहारमात्राबाध्यम् ।

तद्व्यावर्त्तनायाह - **परमिति** । परमार्थसत्यमत्यन्ताबाध्यमित्यर्थः ।

तथा च **श्रुतिः** - **'सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यमिति'** - **प्राण**शब्दोदितानां व्यवहारतः सत्यानामधिष्ठानभूतं परमार्थसत्यमात्मानं दर्शयति ।

एवं , **'सत्यं ज्ञानमनन्तं ब्रह्म'**, **'ऐतदात्म्यमिदं सर्वं'** , **'तत्सत्यं स आत्मा तत्त्वमसि'**, इत्यादिश्रुतिरपि ब्रह्मात्मशब्दोदितं परं तत्त्वमबाध्यं दर्शयति ।

ब्रह्मणो जगद्भ्रमाधिष्ठानत्वेनोपादानत्वं तद्बाधावधित्वात्पारमार्थिकत्वञ्च

सर्वभ्रमाधिष्ठानत्वात्सर्वबाधावधित्वाच्च परमार्थसत्यम् । न हि – निरधिष्ठानो भ्रमोऽस्ति , न वा - निरवधिर्बाधः । तत्र सर्वभ्रमाधिष्ठानत्वं **जन्माद्यस्य यतः** - इत्यादिना दर्शितं, सर्वबाधावधित्वञ्च **तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा** - इत्यादिना ।

शुद्धस्य निदिध्यासनविषयत्वम्

तं **परं सत्यं** = सर्वाधिष्ठानं सन्मात्रमखण्डवाक्यार्थभूतं श्रुत्वा मत्वा च वयं मुमुक्षवो **ध्यायेम** = निदिध्यासेम । ध्यानमत्र निदिध्यासनरूपमेवाभिप्रेतं , न तूपासनम् ।

निदिध्यासनलक्षणम्

निदिध्यासनं हि वस्तुस्वरूपापेक्षप्रत्ययानन्तरितशाब्दज्ञानसन्ततिरूपम् - **'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य'** - इति **श्रुत्या** , **'ततस्तु तं पश्यते निष्कलं ध्यायमान'** - इति **श्रुत्या** च आत्मसाक्षात्कारत्वेन विहितम् ।

उपास्तिलक्षणम्

उपासनन्तु वस्तुस्वरूपानपेक्षं पुरुषेच्छामात्रं तन्मानसक्रियाप्रवाहरूपम् । यथा - **'यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद् वषट्करिष्यन्'** - इत्यादि । इदञ्च वस्तुस्वरूपानपेक्षमपि तदविरोधि , किञ्चित्तद्विरोध्यपि । यथा - **'वाचं धेनुमुपासीत'** - इत्यादि ।

शुद्धस्योपास्त्यविषयत्वम्

द्विविधमप्युपासनं **श्रुत्या** ब्रह्मणि निषिद्धं , **'तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते'** - इति ।

शुद्धस्य निदिध्यासनविषयत्वम्

शुद्धगोचराया वृत्तेरुपनिषन्मात्रकरणकत्वात् , **'तं त्वौपनिषदमि'** - त्यादि**श्रुतेः** , तस्या एवावर्त्यमानाया निदिध्यासनरूपत्वाद्युक्तं शुद्धगोचरत्वम् ।

एतावन्मात्रपर्यवसानाच्च सर्वसाधनविधीनां , **धीमहीत्युक्तम्** ।

निदिध्यासनस्य मङ्गलत्वम्

एतस्य च मङ्गलत्वं

सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् ।
येषां हृदिस्थो भगवान्मङ्गलायतनो हरिः ॥

इत्यादिशास्त्रसिद्धम् ।

शुद्धतोपपादनाय ब्रह्मणस्तटस्थलक्षणकथनम्

एवं शुद्धस्य ब्रह्मणो निदिध्यास्यमानस्य परमार्थसत्यतामुपपादयितुं तत्पदार्थस्वरूपतामाह - **जन्माद्यस्य यत** इत्यादिना । **अस्य** = प्रत्यक्षादिसकलप्रमाणसन्निधापितस्य जगतो , **जन्मादि** = जन्मस्थितिभङ्गं **यतो** भवतीति ; **तं सत्यं धीमहीति** - सम्बन्धः ।

ब्रह्मणो जगदुपादानत्वे प्रमाणानि

तथा च **श्रुतिः** - **'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति'** - इत्याद्या , **'आनन्दो ब्रह्मेति व्यजानात् , आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते'** - इत्याद्या च , जगज्जन्मस्थितिलयकारणतां ब्रह्मणो दर्शयति ।

यत इति प्रकृतौ पञ्चमी । **जनिकर्तुः प्रकृतिः** इति **पाणिनि**स्मरणात् । **जन्मादीति** तद्गुणसंविज्ञानो बहुव्रीहिः । **सर्वादीनि सर्वनामानि** इतिवत् । जन्मनश्चादित्वं श्रुतिनिर्देशापेक्षं वस्तुवृत्तापेक्षञ्च ।

शून्यस्य जगदुपादानत्वनिरासः

ननु **'असद्वा इदमग्र आसीत्'** - इति **श्रुतेः** , शून्यमेव जगत्कारणमस्तु । नेत्याह - **अन्वयात्** इति । **'इदं सदिदं सदिति'** - सद्रूपस्यैव कारणस्य कार्येष्वनुस्यूतत्वात् । **इतरतश्च** = असतोऽनन्वयात् 'शून्यमिति' – प्रतीत्यभावात् , **'कुतस्तु खलु सोम्यैवं स्यादिति होवाच कथमसतः सज्जायेत'** - इतिवाक्येनासतः कारणताप्रतिषेधाच्च । सद्रूपं ब्रह्मैव जगदुपादानमित्यर्थः । **सदेव सोम्येदमग्र आसीत्'** - इति **श्रुतिवाक्यान्वयात्** । **इतरतश्च** -**'असद्वा इदमग्र आसीत्'** - इत्यसतः सत्तान्वयाच्चेति - वा । तथा चासत्यमिदं सूक्ष्मत्वेन गौण्या वृत्त्या सत्ये च योजनीयम् । एतच्च **'समाकर्षात्'** इति **सूत्रेण** व्याख्यातम् । **इतरतश्चे**त्यत्र **चकारा**दसतोऽन्वयलाभः ।

कार्यस्य विनाशित्वेऽपि तदुपादानस्य नित्यत्वम्

अथवा -
कार्यान्वयाद् ब्रह्म कारणमित्युक्ते , कार्यविनाशे तस्य विनाशमाशङ्क्योक्तम् - **इतरतश्चेति** ।

तथा हि - घटनाशेऽपि तदन्विता मृन्न विनश्यति । घटभिन्ने शरावादौ तस्या **अन्वयात्** । एवं सदपि । **इतरत** = इतरत्र कार्यान्तरे तदुपल**भ्यान्वयादि**त्यर्थः ।

चेतनस्य जगत्कारणत्वम्

वाक्यार्थानुपपत्त्यादिदोषाच्च , नासतो जगत्कारणतेत्याह - **अर्थेष्वभिज्ञ** इति ।

न हि सताऽप्यर्थेनाऽविदित्वा कश्चिद्रचयितुं शक्यते , किं पुनरवस्तुनेति - भावः ।

तथा च **श्रुतिः** - '**यस्सर्वज्ञस्सर्वविद्यस्य ज्ञानमयं तपस्तस्मादेतद्ब्रह्म नाम रूपमन्नञ्च जायत**' इति , '**सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेय** - इत्याद्या चित्स्वरूपसाधनप्रयोजनादिविज्ञानवत एव जगत्कारणत्वं दर्शयति ।

जगत्कारणस्य सर्वज्ञत्वम्

अभितः = सर्वप्रकारेण सामान्यतो विशेषतश्च सर्वं वस्तु जानातीति **अभिज्ञः** । '**सर्वज्ञस्सर्वविदिति**' - पदद्वयार्थो दर्शितः । **अर्थेष्विति** सप्तमी सर्वत्रैकरूपेव वृत्त्या कल्पितत्वरूपा विषयतेति सूचयति ।

अचेतनस्य जगत्कारणतानिरासः

अथवा - **अन्वयादितरतश्चार्थेष्विति** पूर्वेणैव सम्बन्धः । एवञ्च सर्वज्ञत्वोपादानत्वेन **परमाणुकारणवादः प्रधानकारणवादश्च** निराकृतः ।

ननु मा भूत्कारणता परमाणूनाम् । प्रधानस्य तु भविष्यति । सत्त्वपरिणामेन सार्वज्ञ्यसम्भवात् । ब्रह्मणश्च निर्धर्मकत्वेन सर्वज्ञानाकर्तृत्वादिति ।
अत आह - **स्वराडिति** । स्वयमेव राजते प्रकाशत इति **स्वराट्** । अन्यानपेक्षः प्र(क्षप्र)काशरूप इत्यर्थः । तथा च, 'सविता प्रकाशत'- इत्यादिवत्कर्त्तृत्वौपचारिकत्वेन , सर्वविषयकज्ञानरूपस्य विवक्षित्वान्न प्रधानस्याचेतनस्य कारणताप्रसङ्ग इत्यर्थः ।

ब्रह्मणो निमित्तोपादानत्वे एकविज्ञानेन सर्वविज्ञानोपपत्तिः

एवञ्चैकविज्ञानप्रतिज्ञा समर्थिता भवति । अन्यथा प्रधानविज्ञानेन तत्कार्यज्ञानसम्भवेऽपि तदकार्याणां पुरुषाणां ज्ञानासम्भवात् । ब्रह्मणि विदिते तु पुरुषाणां स्वत एव तद्रूपत्वादितरेषाञ्च तत्र कल्पितत्वेन तदव्यतिरेकात् , **'येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्'** इत्यादिश्रुत्या **'कस्मिन्नु भगवन्विज्ञाते सर्वमिदं विज्ञातं भवति'** इत्याद्यया **'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितम्'** इत्याद्यया च प्रतिपादितैकविज्ञानेन सर्वविज्ञानोपपत्तेः ।

ब्रह्मणः शास्त्रयोनित्वम्

ननु ब्रह्मकारणत्वेऽप्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञा नोपपद्यते । वेदस्यापौरुषेयत्वेन स्वातन्त्र्याभ्युपगमात् । तस्य ब्रह्मकार्यत्वे पौरुषेयत्वेनाप्रामाण्यप्रसङ्गात्किम्बला ब्रह्मकारणताऽपि व्यवस्थाप्येत । तस्मात्सङ्कोचितायां प्रतिज्ञायां स्वकार्यापेक्षया प्रज्ञानमपि लब्धप्रसरमित्याशङ्क्याह - **तेने** इत्यादि ।
ब्रह्म = वेदं , **यस्तेने** = विस्तारितवांश्छ्वासप्रश्वासादिवल्लीलयाऽऽविर्भावितवान् । तथा च **श्रुतिः - अस्य महतो भूतस्य नि(निः)श्वसितमेतद्यदृग्वेदो यजुर्वेद** - इत्याद्या वेदस्यापि ब्रह्मोपादानतां दर्शयति ।

वेदस्यापौरुषेयत्वम्

न च ब्रह्मकार्यत्वे सति तस्य पौरुषेयत्वम् । पुरुषमात्रजन्यत्वेऽपि पौरुषेयत्वे , वर्णानां नित्यत्वेऽप्यानुपूर्वीविशेषस्य पुरुषजन्यत्वात् , मीमांसकम्मन्यस्यापि वेदाप्रामाण्यप्रसङ्गः । वर्णनित्यतामात्रेणैवा-पौरुषेयत्वव्यवस्थापने लौकिकवाक्यस्यापि तत्प्रसङ्गः । **तस्मान्मानान्तरेणार्थमुपलभ्य रचितत्वं पौरुषेयत्वं सापेक्षलक्षणाप्रामाण्यप्रयोजकम्** । तच्च न वेदे । वेदार्थस्य माना(न्तरा)गोचरत्वात् ।

इदमेव **श्रुत्या नि(निः)श्वसित**दृष्टान्तेन दर्शितम् । यथा हि निः(नि)श्वासः पुरुषाज्जायमानोऽपि न पुरुषचिकीर्षाजन्यः , सुषुप्तावपि दर्शनात् ; एवं वेदो ब्रह्मणस्सकाशाज्जायमानोऽपि न चिकीर्षाजन्यः , तदर्थस्य वेदातिरिक्तमानाविषयत्वात् । तथा वेदतदर्थज्ञानयोस्तुल्यकालत्वान्न ब्रह्मणस्सार्वज्ञ्यव्याघातो , न वा वेदस्य पौरुषेयत्वम् ।

एवञ्च सत्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञा न सङ्कोचनीया । बाधकाभावात् ।

ब्रह्मणो वेदोपादानत्वेऽनुमानम्

अत्र चेदमनुमानं सूचितं - वेदनिष्ठसर्वार्थप्रकाशनशक्तिः सदुपादाननिष्ठा कार्यगतप्रकाशनशक्तित्वाद्वह्न्युपादानकदीपगतप्रकाशनशक्तिवद् - इति । अतो वेदोपादानत्वेनापि ब्रह्मणस्सार्वज्ञ्यसिद्धिः ।

हिरण्यगर्भस्य वेदाप्रवक्तृत्वं जगदनुपादानत्वञ्च

केचिद् - हिरण्यगर्भ एव वेदप्रवक्ता जगत्कारणञ्च - इत्याहुः । तन्निराकरोति - **हृदा य आदिकवय** इति । **आदिकवि**र्हि हिरण्यगर्भः । **तस्मै हृदा** सह **यो ब्रह्म तेने** । अन्तःकरणं सूक्ष्ममहाभूतकार्यमुत्पाद्य तदुपाधेर्हिरण्यगर्भस्य वेदार्थज्ञानं कारितवानित्यर्थः ।

तथा च **श्रुतिः** -

यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ।

तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥

इति हिरण्यगर्भतद्वेदाविर्भावयोः परमेश्वराधीनतां दर्शयति । तदपि **हृदा** = **मनसैव तेने** , न तु मुखेनाध्यापितवान् ।

मनसैव वेदार्थग्राहितृत्वेन ब्रह्मणः सर्वान्तर्यामित्वम्

अनेन - सर्वान्तर्यामित्वं - दर्शितम् । तथा च **श्रुतिः** - **यस्सर्वेषु भूतेषु तिष्ठति** , **सर्वेभ्यो भूतेभ्योऽन्तरो** , **यं सर्वाणि भूतानि न विदुर्यस्य सर्वाणि भूतानि शरीरं यस्सर्वाणि भूतान्यन्तरा यमयत्येष त आत्माऽन्तर्याम्यमृत** - इत्याद्या सर्वान्तर्यामित्वेन परमात्मानं प्रतिपादयति ।

तार्किकादीनां वेदान्तप्रामाण्ये मोहः

ननूदाहृतश्रुतीनां ब्रह्मणि प्रामाण्यं न सम्भवति , ब्रह्मणस्सिद्धत्वेन मानान्तरायोग्यत्वादन्ततस्स्वरूपचैतन्यस्यैव मानान्तरत्वात् । तथा च तत्संवादे श्रुतीनां नाज्ञातज्ञापकत्वलक्षणं प्रामाण्यम् । विसंवादे तु बाधितविषयत्वात्सुतरामप्रामाण्यम् । तथा च प्रधानपरमाण्वादिकार-णताबोधकमनुमानं लब्धावकाशं भविष्यतीत्याह - **मुह्यन्ति यत्सूरय** इति ।

यत् = यत्र यस्मिन्विषयेऽखण्डानन्दाद्वये स्वरूपचिन्मात्रलक्षणे । **सूरयः** = तार्किकादयः । **मुह्यन्ति** = मोहज्ञानमनुभवन्ति ।

मोहस्य द्वैविध्यम्

मोहो द्विविधः - **आवरणरूपो विक्षेपरूपश्च** ।

आवरणस्यापि द्वैविध्यम्

आवरणरूपोऽप्यसत्ता(त्त्वा)वरणरूपोऽभानावरणरूपश्चेति - द्विविधः ।

'नास्ति शुद्धं ब्रह्म' , 'न भासते चे'- ति द्विविधोऽपि मोहो वेदान्तशा-स्त्रविमुखैरनुभूयते ।

अभानावरणनिवारणाय साक्षात्कारसाधनानुष्ठानम्

वेदान्तशास्त्रविचारपराणान्तु परोक्षज्ञानेनासत्तावरणनिवृत्तावप्यभानावरणमनुवर्त्तत एव , 'नास्ति ब्रह्मे'ति प्रतीत्यनुदयेऽपि 'मम न भाति ब्रह्मे'ति तेषां प्रतीतेः । अत एव , ते तदभानावरणनिवर्त्तकस्य साक्षात्कारस्य साधनान्यनुतिष्ठन्ति ।

विक्षेपावरणम्

एवञ्च विक्षेपावरणकार्यं भ्रमविशेषरूपं प्रत्यक्षमेव । यतो -'जीवाद्भिन्न एवेश्वरो जगतो निमित्तकारणमात्रमेवे'ति **तार्किकवैशेषिकपातञ्जलपाशुपतादयो** व्यवहरन्ति । **साङ्ख्यमीमांसकादयस्तु** जगन्निमित्तकारणत्वेनापि नेश्वरमुपपादयन्ति , किन्तु प्रधानपरमाण्वाद्येव तेन रूपेणोपास्यमित्याहुः ।

वेदान्तानां प्रामाण्यम्

तस्माद्ब्रह्मविषयकमोहस्यापरोक्षत्वात्स्वरूपचैतन्यस्य च तत्साधकत्वेन तदनिवर्त्तकत्वात्तन्निवर्त्तकवृत्त्युत्पादनेन वेदान्तानां प्रामाण्यमव्याहतमेव । सिद्धत्वेऽपि च ब्रह्मणो मानान्तरायोग्यत्वं रूपादिहीनत्वेन व्युत्पादितं **भाष्यकारप्रभृतिभिः** ।

प्रपञ्चमिथ्यात्वम्

एवं पूर्वार्धेन **तत्पदवाच्यार्थ**मुक्त्वा , (अ)परार्धेन तल्लक्ष्यं वक्तुमारभमाणोऽ'**ध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते**' - इति **न्यायेना**ऽऽह - **तेजोवारीत्यादिना** ।

यत्र = ब्रह्मणि ; त्रयाणां तेजोऽबन्नानां सर्ग**स्त्रिसर्गः** , स ; **मृषा** = मिथ्यैव , शुक्तौ रजतवत् ।

छान्दोग्ये सृष्टिप्रकरणे तेजोऽबन्नानां साक्षात्पठितत्वा**त्त्रिसर्ग** इत्युक्तम् । **वियदधिकरणन्यायेन** तु पञ्चभूतसर्ग इति द्रष्टव्यम् ।

तन्मिथ्यात्वे दृष्टान्तमाह - **तेजोवारिमृदां यथा विनिमय** इति । **विनिमयो** = व्यत्ययो व्यत्यासो व्यामिश्रीभावोऽन्यस्मिन्नन्यावभासरूप इति यावत् ।

तथा च , **श्रुतिः** - **'यदग्ने रोहितं रूपं तेजसस्तद्रूपं , यच्छुक्लं तदपां , यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं , वाचारम्भणं विकारो नामधेयं , त्रीणि रूपाणीत्येव सत्यम्'**- इत्यादिना कृत्स्नस्यापि विकारस्यानृततां दर्शयति ।

आरम्भपरिणामवादयोर्निराकरणम्

न **ह्यारम्भवादो** वा **परिणामवादो** वा सम्भवति ।

तथा हि - **'परमाणुः परमाण्वन्तरेण संयुज्यमानो द्व्यणुकमारभते'** - इत्यभ्युपेयते । तत्र द्व्यणुकासमवायिक(का)रणभूतस्संयोगः परमाण्वोः कात्स्न्र्येन वा समवायादेकदेशेन वा । आद्ये प्रथिमानुपपत्तिः । द्वितीये सावयवत्वापत्तिः । एवं **परिणामोऽपि प्रधानस्य** कात्स्न्र्येन तदेकदेशेन वा । आद्ये कारणविनाशापत्तिः । द्वितीये सावयवत्वापत्तिः ।

न चेष्टमेव तत् । सावयवत्वे तस्यापि जन्यत्वेन मूलकारणत्वानुपपत्तिः ।

उत्पत्तेः प्राक्कार्यस्य सत्त्वासत्त्वविचारः

एवं कार्यमपि कारणव्यापारात्प्राक्सदसद्वा(प्रागसत्सद्वा) ।

असत्कार्यवादनिरासः

आद्ये कथं कार्यकारणभावग्रहः । न हि खपुष्पेण समं कस्यचित्सम्बन्धो गृह्यते ।

ननूत्पत्स्यति घट इव, प्रतियोगित्वेनासतोऽपि कार्यत्वं भविष्यतीति चेत् ।

हन्त, प्रागभावप्रतियोगित्वं निराश्रयं साश्रयं वा । आद्ये शशविषाणतुल्यता । द्वितीये सत्कार्यवादापत्तिः । प्रागभावप्रतियोगित्वाश्रयत्वेनैव कार्यसत्त्वाङ्गीकारात् ।

सत्कार्यवादनिरासः

न च **सत्कार्यवादो**ऽपि घटते । कारणव्यापारवैयर्थ्यापत्तेः । आविर्भावतिरोभावयोरपि सदसत्त्वविकल्पग्रासात् ।

अनिर्वचनीयत्वेन परिशेषाद्विवर्त्तवादः

तस्मात्सदसद्विलक्षणत्वेनैवानिर्वचनीयतैव कार्यकारणयोरिति **विवर्त्तवादो**ऽवशिष्यते । तथा चाविद्यावशाच्छुद्धे ब्रह्मणि द्वैताभासो मिथ्येत्यर्थः ।

अविद्यायाः सत्यत्वे पूर्वपक्षः

नन्वविद्याकार्याणामसत्यत्वेऽप्यविद्यायास्सत्यत्वमस्तु , अनादिभावत्वाद् ब्रह्मवत् । कल्पकशून्यत्वाच्च । न हि द्वैतप्रपञ्चकल्पनाहेतोरविद्यायाः कल्पकान्तरमस्ति । स्वस्या एव कल्पकत्वे आत्माश्रयत्वात् । अविद्यान्तराभ्युपगमे चानवस्थानात् । तथा चैकविज्ञानेन सर्वविज्ञानव्याघातोऽनिर्मोक्षापत्तिश्चेति ।

अविद्यायाः कल्पितत्वं सिद्धान्ते

अत आह - **धाम्ना स्वेन सदानिरस्तकुहकमिति** । **सदानिरस्तं** = नित्यनिवृत्तं , **कुहकं** = कपटमविद्याख्यं यस्मिंस्तत्तथा । तत्र हेतुः - **स्वेन धाम्नेति** । अखण्डानन्दाद्वितीयचैतन्यरूपत्वादित्यर्थः । तथा च **श्रुतिः** - **'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्'** - इत्यादिरन्यथानुपपद्यमानै**रेकैवाद्वितीय**शब्दैरखण्डमेव वस्तु प्रतिपादयति ।

दृग्दृश्यसम्बन्धानुपपत्त्या , कल्पितत्वेनैवाविद्यायाश्चैतन्यभास्यत्वनियमाच्च । एतस्या एव च स्वपरसाधारणकल्पनामूलत्वान्नाविद्यान्तराभ्युपगमदोषः । उत्पत्त्यनङ्गीकारेण , ज्ञप्तेश्च नित्यत्वेन , नात्माश्रयदोषः ।

परमार्थसत्यत्वं नित्यत्वस्य प्रयोजकम्

अनादिभावत्वञ्चात्मनो नित्यत्वप्रयोजकं न भवति । किन्तु परमार्थसत्यत्वम् ।
अविद्यायास्सदसद्विलक्षणत्वाज्ज्ञाननिवृत्त्यो(निवर्त्त्यतो/निवर्त्त्यतयो)पपत्तिः ।

तत्त्वम्पदयोर्लक्ष्यप्रदर्शनम्

तथा च , मायातत्कार्यहीनः परमात्मा **तत्पदलक्ष्यो** दर्शितः ।
एतेनैव - त्वंपदलक्ष्योऽपि - दर्शितः । तस्यापि मायातत्कार्यहीनत्वात् ।
जाग्रत्स्वप्नसुषुप्तिसाक्षिणस्तद्वत्त्वाभावात् ।
एवञ्च , पदार्थज्ञानपूर्वकं वाक्यार्थबोधे सति तदावृत्तिरूपं **निदिध्यासनमु**पपन्नम् ।

मूलपदसूचितार्थाः

अत्र '**जन्माद्यस्य यत**' इत्यनेनानन्दरूपत्वं दर्शितम् । '**आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते**' इत्यादिश्रुतेः । '**अन्वयादि**'-त्यनेन सद्रूपत्वं नित्यत्वं विभुत्वञ्च । सर्वदेशकालान्वयबोधनात् । '**स्वराडि**'-त्यनेन स्वप्रकाशज्ञानरूपत्वम् । '**धाम्ना स्वेन सदा निरस्तकुहकमि**'-त्यनेनाद्वितीयत्वम् । '**सत्यमि**'-त्यनेन परमार्थत्वम् । इति '**सत्यं ज्ञानमनन्तं ब्रह्म**', '**विज्ञानमानन्दं ब्रह्मे**'-त्यादिवाक्यार्थो दर्शितः ।

अथ जीवपरव्याख्यानम्

अथ च **त्वम्पदार्थो**ऽपि शक्यतेऽनेन **श्लोकेन** दर्शयितुम् । श्लेषालङ्कारस्यात्यन्तचारुताहेतुत्वात् ।
तथा हि - '**यो** = जीवः **अस्य** = देहेन्द्रियादेः **जन्मादि** = विकारजातम् **अन्वयाद्** = अनुगतवानविद्ययात्मन्यारोपितवान् । **तं परं सत्यं धीमही**'-ति **सम्बन्धः** । **अस्य** कीदृशस्य । **यतो** = गच्छतः । सर्वदा परिणममानस्येत्यर्थः । **जन्मादि** गच्छत इति वा ।

जीवे जन्माद्यन्वयस्य स्वतस्त्वनिराकरणम्

ननु 'जातो देवदत्तो' , 'मृतो देवदत्त' इति प्रतीतेः , **'तद्यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनस्सर्व एत आत्मानो व्युच्चरन्ती'**-ति **श्रुतेश्च** , स्वत एव जन्मादिमान्जीवोऽस्तु ।
नेत्याह - **इतरतश्चेति** । जन्माद्ययोग्यत्वादित्यर्थः । तथा च **श्रुतिः** - **'न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चिदि'**-ति , **'अजो नित्यश्शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे'** - इत्याद्या **स्मृतिश्च** जीवस्य जन्मविनाशौ वारयति ।

व्युच्चरन्तिश्रुतेरुपपादनम्

कृतहानाकृताभ्यागमादिदोषप्रसङ्गादुपाध्युत्पत्तिमात्रेणैव **व्युच्चर-न्तीत्यादिश्रुत्युपपत्तेः** । **'तद्गुणसारत्वादि'**-त्यादिन्यायाच्चेति **चका-रार्थः** ।

चार्वाकमतनिरासः

देहमिन्द्रियं मनः प्राणञ्च **केचिदात्मत्वेन** प्रतिपन्नाः । तान्निराकरोति - **अर्थेष्वभिज्ञ** इति । न हि भौतिकानां देहेन्द्रियप्राणमनसां ज्ञातृत्वं सम्भवति । घटादावपि तत्प्रसङ्गाद् , एतेषाञ्चानित्यत्वाद् , आत्मनित्यत्वस्य च व्यवस्थापितत्वात् ।
एतेन - विभुत्वमपि - **व्याख्यातम्** (?) । विभुत्वं हि मध्यमपरिमाण-त्वेनानुपपद्यमानं परमाणुत्वे परममहत्त्वे वा व्यवतिष्ठेत् ।
एतेन -'देहाद्यतिरिक्तोऽपि देहपरिमाण एवात्मेति'- **क्षपणकपक्षो** - **निरस्तः** । (?)

आत्मनः स्वप्रकाशत्वम्

तत्र परमाणुत्वे सकलशरीरव्यापिसुखदुःखानुपलम्भप्रसङ्गात्सक-लदेहव्यापकोऽस्तु । **तर्हि** देहेन्द्रियातिरिक्तो विभुरेवात्मा ज्ञानाश्रयो , न तु ज्ञानरूप इति ।

तत्राह - **स्वराडिति** । स्वयमेव राजत इति **स्वराट्** = स्वप्रकाशज्ञानरूपः । न तु ज्ञानाश्रय इत्यर्थः । '**अत्रायं पुरुषस्स्वयञ्ज्योतिर्भवती**'-त्यादिश्रुतेः । सन्देहविपर्ययाद्यविषयत्वेन सर्वदा भासमानत्वात् , स्वजन्यज्ञानविषयत्वे च कर्त्तृकर्मभावविरोधात् , '**ज्ञोऽत एवे**'-तिन्यायाज्ज्ञानरूप एवात्मेत्यर्थः ।

शास्त्रारम्भस्यावैयर्थ्यम्

ननु जीवस्य स्वप्रकाशज्ञानरूपत्वे जन्मादिशून्यत्वे च ब्रह्मणो भेदकाभावात् , स्वत एव च ब्रह्माभिन्नत्वे शास्त्रारम्भो निरर्थकस्स्यात् । ब्रह्मावबोधस्य सर्वदा विद्यमानत्वादिति ।

अत आह - **तेनेऽब्रह्म हृदा य आदिकवये** इति । **हृदा** = मनसा तदुपाधिना तादात्म्यापन्नस्सन्**नब्रह्म** ब्रह्मविपरीतं कर्त्तृत्वभोक्तृत्वादिलक्षणं संसारं संसरणरूपं विस्तारितवान् ।

तथा च **श्रुतिः** - '**स समानस्सन्नुभौ लोकावनुसञ्चरति ध्यायतीव लेलायतीव सधीश्शन्नो(धीस्स्वप्नो ?) भूत्वे**'-त्याद्या सम्बन्धादसंसारिणोऽपि संसारितां दर्शयति ।

तथा च तन्निवृत्तये ब्रह्मात्मतोपदेशो युक्त इत्यर्थः ।

संसारस्य मोक्षहेतुता

संसारस्य मोक्षहेतुतां दर्शयति - **आदिकवय** इति । **आदिभूतं कं** = सुखं ब्रह्मानन्दरूपो मोक्ष इत्यर्थस्तस्य **वयः** प्राप्तिस्तदर्थम् । '**अय-वय गतावि**'-**ति** स्मरणात् । '**निमित्तात्कर्मसंयोगे चेयं सप्तमी**' , '**चर्मणि द्वीपिनं हन्ती**'-तिवत् । न हि संसाराभावे श्रवणमननादिसाधनानुष्ठानं सम्भवति , न च तदभावे तत्प्रज्ञानोदयः , न च तमन्तरेणानाद्यविद्यानिवृत्तिरिति - मोक्षार्थमेव संसारं विस्तारितवानित्यर्थः ।

तथा च श्रुतिः -'**रूपं रूपं प्रतिरूपो बभूव**' , '**तदस्य रूपं प्रतिचक्षणाये**'-ति , '**मायाभिः पुरुरूप ईयत**' इति च । '**ब्रह्म वा इदमग्र आसीदि**'-ति '**आत्मानमेव वेदाहं ब्रह्मास्मी**'-ति '**तस्मात्तत्सर्वमभवदि**'-**ति** च संसारद्वाराऽविद्यानिवृत्तिरूपं मोक्षं दर्शयति ।

प्रतिदेहं ब्रह्मणोऽभिन्नत्वमानन्दरूपत्वञ्च

ननु तर्हि भवतु 'स्वप्रकाशज्ञानरूप आत्मा , किन्तु नानन्दरूपः , प्रतिशरीरं भिन्नश्चेति' - **साङ्ख्यमतम्** ।

तत्राह - मुह्यन्ति यत्सूरय इति । **यद्** = यत्र यस्मिञ्जीवस्वरूपे , **सूरयः** = तार्किकाद्यपेक्षया सुधियोऽपि साङ्ख्या , **मुह्यन्ति** = भ्राम्यन्ति शुद्धस्वरूपं जानन्तोऽप्यानन्दरूपत्वं प्रतिदेहमेकत्वं ब्रह्माभिन्नत्वञ्चाजानन्तः ।

तथा च **श्रुतयः - 'एष एव परम आनन्द'** - इति , **'एको देवस्सर्वभूतेषु गूढ'**- इति , **'अयमात्मा ब्रह्मे'**-ति तादृग्रूपतां जीवस्य बोधयन्ति । **'तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादान्तरं यदयमात्मे'**-ति श्रुत्यन्तराच्च , परमप्रेमास्पदत्वादानन्दरूपत्वम् ।

आत्मैकत्वनिरुपणम्

नानात्वे भोगव्यवस्थानुपपत्तेः , प्रतिदेहमेकत्वम् । न हि – विभूनामात्मनां सर्वदेहसम्बन्धित्वाविशेषे कर्मादिकमपि भोगनियामकं भवितुमर्हति । अविशेषात् । **एकात्मवादे** तु तदन्तःकरणावच्छिन्नप्रदेशानां भिन्नत्वादुपपद्यत एव व्यवस्था । देहभेदादेव च प्रतिसन्धानाभावः ।

एवञ्च भेदकशून्यत्वाद् , ब्रह्माभिन्नत्वमपि सिद्धम् । लक्षणैक्यात् ।

उपाधिसंसर्गो मिथ्यैव

एवं त्वम्पदवाच्यार्थं पूर्वार्द्धेन प्रतिपाद्य , तल्लक्ष्यमुत्तरार्धेन वक्तु**म-ध्यारोपापवादन्यायेनार**भते - **'तेजोवारिमृदां यथा विनिमय'** - इत्यादिना ।

यत्र = आत्मनि , **त्रयाणां** = स्थूलसूक्ष्मकारणोपाधीनां जाग्रत्स्वप्न-सुषुप्त्यवस्थाहेतूनां , **सर्गः** = संसर्गो **मिथ्यैव**; न तु परमार्थतः । **'स यत्तत्र किञ्चित्पश्यत्यनन्वागतस्तेन भवति'** , **'असङ्गो ह्ययं पुरुष'**- इत्यादि**श्रुतिभ्यः** । साक्ष्यस्य साक्षिधर्मा(र्मत्वा)नुपपत्तेः । भास्यस्य घटादेर्भासकदीपादिधर्मत्वादर्शनात् । मिथ्यात्वे दृष्टान्तः - **तेजोवारीति** ।

वारिणि करकारूपे मृद्बुद्धिः । एवं काचादिरूपायां मृदि तेजोबुद्धिरित्युदाहार्यम्।
तथा चेदमनुमानं सूचितम् - आत्मनि जाग्रदादिबुद्धिर्मृषा , तदभाववति तद्बुद्धित्वात् , तेजसि वारिबुद्धिवत् (?) । तदभाववत्त्वञ्चात्मनश्श्रुतिस्मृतिन्यायैर्निश्चितमिति नासिद्धिः।

सदानिरस्तकुहकः शास्त्रविषयः

एवं लक्षणैक्येन ब्रह्माभिन्नत्वं दर्शयति - **धाम्ना स्वेन सदानिरस्तकुहकमिति** । एतदेव (?) तत्पदार्थत्वम्पदार्थतदैक्यकथनद्वारेण शास्त्रस्य विषयो दर्शितः।

निदिध्यासनस्य प्रतिपाद्यत्वम्

तत्र श्रवणमनननिदिध्यासनानां तृतीयञ्च निदिध्यासनमिह प्रतिपाद्यते । मनननिदिध्यासनवतो विजातीयप्रत्ययनिवारणस्य मनोनिग्रहद्वारा व्युत्पाद्यमानत्वात्।

शारीरकमीमांसारूपत्वं श्रीमद्भागवतस्य

चतुर्लक्षणमीमांसारूपत्वञ्चास्य सूचितम्।
तथा हि - पूर्वार्द्धेन **'जन्माद्यस्य यतः'** (ब्र.सू. १।१।२) इति न्यायस्साक्षादेव दर्शितः । **'अन्वयादि'**-त्यनेन **'तत्तु समन्वयात्'**(ब्र.सू. १।१।४) इति । **'अर्थेष्वभिज्ञ'** - इत्यनेन **'ईक्षतेर्नाशब्दम्'**(ब्र.सू. १।१।५) इति । **'तेने ब्रह्म हृदे'**-त्यादिना **'शास्त्रयोनित्वात्'**(ब्र.सू. १।१।३) इति । **'मुह्यन्ति यत्सूरय'** इत्यनेन **'एतेन सर्वे व्याख्याता व्याख्याता'** (ब्र.सू. १।४।२०) इत्यन्तो न्यायकलापस्सूचितः । इति **समन्वयाध्यायो** व्याख्यातः । **'तेजोवारिमृदामि'**-त्यादिना **'तदनन्यत्वमारम्भणशब्दादिभ्य'** (ब्र.सू.२।१।१४) इत्यादिन्यायसूचनाद**विरोधाध्यायार्थः** । **'धीमही'**-त्यनेन **'सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवद्'** (ब्र.सू. ३।४।४७) इत्यादिन्यायसूचना-

त्साधनाध्यायार्थः । **'धाम्ना स्वेन सदानिरस्तकुहकं सत्यं परमि'**-ति **फलाध्यायार्थः** , अविद्यातत्कार्यनिवृत्त्युपलक्षितपरमानन्दरूपावशेषात् ।

पारमहंससंहितात्वोपपत्तिः

एवं सति **'पारमहंसी संहिते'**-ति समाख्योपपद्यते । परमहंसानां वेदान्तवाक्यार्थनिदिध्यासनरूपत्वादत्रोपाख्यानानां तत्तात्पर्यकत्वात् ।

गायत्रीरूपत्वमस्य शास्त्रस्य

एवं **'ध्यायेमे'**-ति पदस्थाने **'धीमही'**-ति छान्दसप्रयोगाद्गायत्रीरूपत्वमस्यास्सूचितम् । **'तत्सवितुर्वरेण्यमि'**-त्यस्यार्थः **'स्वराडि'**-त्यनेन सूचितः । **'भर्गो देवस्य धीमही'**-त्यस्यार्थो **'जन्माद्यस्य यत'**- इत्यादिना सूचितः । **'धियो यो नः प्रचोदयादि'**-त्यस्यार्थः **'तेने ब्रह्म हृदे'**-त्यादिना सूचितः ।

तथा च गायत्रीवदनिशं जप्तव्यैषा संहितेति - दर्शितम् ।

भागवतलक्षणम्

लक्षणञ्च श्रीभागवतस्य सूचितम् । तथा च **मत्स्यपुराणे** पुराणदानप्रस्तावे -

यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः ।
वृत्रासुरवधोपेतं तद्वै भागवतं विदुः ॥

इति गायत्र्युपक्रमो लक्षणत्वेनोक्तः ।

सर्गादिदशलक्षणसूचनम्

एवञ्च सर्गादीन्यपि दश लक्षणान्यनेन **श्लोकेन** सूचितानि ।

'जन्माद्यस्य यत'- इत्यनेन **सर्गविसर्गस्थानानि** तृतीयचतुर्थ-**पञ्चमस्कन्ध**व्युत्पाद्यानि सूचितानि । **'तेने ब्रह्म हृदा य आदिकवय'**- इत्यादिना भक्तानुग्रहलक्षणं **पोषणं षष्ठस्कन्ध**व्युत्पाद्यं सूचितम् । **'मुह्यन्ति यत्सूरय'**- इत्यनेन कर्मवासनारूपा **ऊतिः**

सप्तमस्कन्धव्युत्पाद्या सूचिता । **मन्वन्तरेशानुकथे अष्टमनवम-स्कन्ध**प्रमेये स्थानमध्य एवान्तर्भूते । '**तेजोवारिमृदां विनिमय**' -इत्यनेन **निरोधो दशमस्कन्धार्थो** दर्शितः । '**धाम्ना स्वेन सदा निरस्तकुहकमि**'-त्यनेन **मुक्तिरेकादशस्कन्धार्थो** दर्शिता । '**सत्यं परमि**'-त्यनेनाश्रयो **द्वादशस्कन्धार्थो** दर्शितः । '**धीमही**'-त्यात्मनेपदोत्तमपुरुषप्रयोगा**दधिकारी प्रथमस्कन्धार्थः** । तेनैव ध्यानोपलक्षित**साधनानुष्ठान**रूपो **द्वितीयस्कन्धार्थः** । इति कृत्स्नभागवतार्थसूचनम् । तदेतद्व्याख्यानमौपनिषदाय रोचते ।

सात्वतमतेन व्याख्यानम्

सात्वतास्तु वर्णयन्ति - पञ्चीकृतपञ्चमहाभूतोपहितं शुद्धचैतन्यं , त-दभिमानि **विराडन्तर्यामिरूपम् ओतम्** इति **अनिरुद्ध** इति चाख्यायते । एवमपञ्चीकृतपञ्चमहाभूतोपहितं शुद्धचैतन्यं , तदभिमानि **हिरण्यगर्भान्तर्यामिरूपम् अनुज्ञात** इति **प्रद्युम्न** इति चाख्यायते । एवं स्थूलसूक्ष्मकारणीभूतं यन्मायात्मकमव्याकृतं तदुपहितं शुद्धं चैतन्यं तन्निष्ठचिदाभासोपलक्षितम् **अनुज्ञा** इति **सङ्कर्षण** इति चाख्यायते । अनुपहितन्तु चैतन्यं सर्वानुस्यूतसन्मात्रं सर्वसाक्षिपरमानन्दघनम् **अविकल्प** इति **वासुदेव** इति चाख्यायते । **सङ्कर्षणप्रद्युम्नानिरुद्धानामपि वासुदेवत्वं** वर्त्तत एव । उपाधिकृतः केवलं नामविशेषः ।

एतच्च **नृसिंहतापनीयोत्तरभागे** व्याख्यायते ओतानुज्ञातानुज्ञावि-कल्पैस्स्थूलसूक्ष्मबीजसाक्षिभिरिति बहुकृत्वोभ्यासेन ।

पाञ्चरात्रिकप्रक्रियानिरासः

अत्र च - '**वासुदेवः परमात्मा** , **सङ्कर्षणो जीवः** , **प्रद्युम्नस्तु मनः** , **अनिरुद्धोऽहङ्कार**' - इति **पाञ्चरात्रिकप्रक्रिया** नादरणीया ; तद्वचनविरोधात् , श्रुतिविरोधाच्च - इत्यादि **उत्पत्त्यसम्भवाद्** (२।२।४२) इत्यधिकरणे व्याख्यातम् ।

'केवलं परमात्मैवानुपहितो वासुदेवः , कारणोपहितस्सङ्कर्षणः , सूक्ष्मभूतोपहितः प्रद्युम्नः , स्थूलभूतोपहितोऽनिरुद्ध' इति यथाव्याख्यानमेवादरणीयम्। श्रौतत्वाद् , उपपन्नत्वाच्च।

वासुदेवस्य उपास्यत्वम्

एवं स्थिते श्लोकयोजना - **परं सत्यं** वासुदेवाख्यं वयं **धीमह्यु**पास्महे। ध्यानमत्रोपासनरूपमेवाभिप्रेतम्। चतुर्व्यूहरचनाया उपासनार्थत्वात्।
नन्वनुपहितस्य वासुदेवस्य बुद्धावनारोहात्कथमुपास्यत्वम्।
सत्यम् । अनिरुद्धादिरूपमप्यविवक्षितोपाधिसम्बन्धं वासुदेवात्मकमेव। श्रोत्रकूपद्वारादिकमिवालक्षिततदुपाधिसम्बन्धमाकाशात्मकमेव । विवक्षितोपाधिसम्बन्धे तु पृथग्व्यपदेशभेदं लभते । न तु तावता वस्त्वन्यत्वं भवति । तथा च तद्द्वारा वासुदेवे मनोवृत्तिः कार्येति वक्तुमारभते -**जन्माद्यस्य यत** इत्यादिना।
अस्य जगतः चतुर्दशभुवनरचनात्मकस्य ब्रह्माण्डस्य **जन्मादि** विकारजातं **यतो** भवति , **तं धीमहीति -सम्बन्धः**।

विराट्स्वराजोः लक्षणभेदौ

तस्य जगद्विरचनयोग्यतामाह - **अर्थेष्वभिज्ञ** इति । ब्रह्माण्डाभिमानिविराडपेक्षया वैलक्षण्यमाह - **स्वराडिति** । **ब्रह्माण्डावच्छिन्नचिदाभासो हि विराड् जीवः । अयं तु तद्बिम्बभूतस्तदन्तर्यामी स्वयमेव राजत इति स्वराट्**। बिम्बभूतत्वेनान्यानपेक्षत्वात्।

हिरण्यगर्भस्य लक्षणम्

एवमनिरुद्धमोतमुक्त्वा , प्रद्युम्नमनुज्ञातमाह - **तेने ब्रह्म हृदा य आदिकवय** इति। **आदिकवये = सूक्ष्मभूतावच्छिन्नचिदाभासाय हिरण्यगर्भसञ्ज्ञकाय जीवाय** । **ब्रह्म** = वेदम्। तदन्तर्यामिरूपेण बिम्बभूतो यस्तन्मनसैव **तेने** - इति हिरण्यगर्भवैलक्षण्यं स्पष्टमेवोक्तम्।

सङ्कर्षणलक्षणम्

सङ्कर्षणरूपतामाह - **मुह्यन्ति यत्सूरय** इति । **यत्** = यत्र त्रिगुणात्मकमायाप्रतिबिम्बस्य जगत्कारणस्य बिम्बभूते सर्वान्तर्यामिणि **सङ्कर्षणा**ख्ये । **सूरयो**ऽपि **भ्राम्यन्ति** = स्थूलसूक्ष्मद्वयप्रपञ्चं भ्रान्त्या कल्पयन्ति , प्रधानपरमाण्वादिरूपेण वा भ्राम्यन्ति ।

वासुदेवस्वरूपम्

वासुदेवरूपतामाह - **तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषे**ति । त्रिविधस्सर्गः **त्रिसर्गः** = आध्यात्मिक आधिदैविक आधिभौतिकश्चेति । **स यत्र मृषा** = सर्वथाऽसन्नेवेत्यर्थः । अपह्नववचनो **मृषा**शब्दः । **त्रयाणाम्** = अनिरुद्धप्रद्युम्नसङ्कर्षणोपाधीनां **सर्गः** = संसर्गो **यत्र मृषे**ति वा । तदेवमुपहितत्वे ।

अनुपहितत्वे - **स्वेन धाम्ना सदानिरस्तकुहकं** = निरस्त(ता)विद्यातत्कार्य(र्यं बि)बिम्बभूतत्वेनोपाधितद्धर्मैरसंस्पृष्टम् । अत एव **परं सत्यं** = वासुदेवाख्यं ध्यायेम - इति निर्गलितोऽर्थः ।

अत्रानिरुद्धपुरुषावतारो नारायणः प्रलयोदकशायी भुवनकमलमूलभूत - इति सविस्तरं **मूल एव व्यक्तीभविष्यति** । इतरेषामपि रूपं **वक्ष्यते** । विस्तरश्चास्याः प्रक्रियाया **मोक्षधर्मे नारायणीयोपाख्यान** इति । तदेतद्व्याख्यानं **पौराणिकाय** रोचते ।

भक्तिमतानुसारेण व्याख्यानम्

केवलभक्तिरसिकास्तु केवलवासुदेवावतारश्रीकृष्णपरतया योजयन्ति । सङ्कर्षणप्रद्युम्नानिरुद्धानां स्वसमाख्ययैव पृथगवतीर्णत्वात् , वासुदेवावतार एव श्रीकृष्णः । **कार्ष्णेयाध्यात्माद्युपाख्यानेष्वपि** तथैव प्रतिपाद्यते । इहापि **'कृष्णस्तु भगवान्स्वयम्'** - इति । तस्मात्तत्परतयैव सर्वाणि पदानि योजनीयानि ।

तं परं सत्यं वासुदेवात्मकं श्रीकृष्णं **वयं ध्यायेम** ।

श्रीकृष्णस्य सर्वप्रेमास्पदत्वेन ध्येयत्वम्

तस्य सर्वप्रेमास्पदत्वेन ध्येयतामाह - **जन्माद्यस्य यत** इति । **यतः** = श्रीकृष्णाद् , यस्मिंश्छ्रीकृष्णे वा । **आद्यस्य** = रतिभावस्य प्रेमाख्यस्य । **जन्म** भवति । सर्वेषामिति शेषः । रतिभावस्य चाद्यत्वं -

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयन्तथा ।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्त्तिताः ॥

इति **भरतेनादौ** पठनात् । सर्वप्राणिरतिविषयत्वञ्च परमानन्दरूपत्वात् । तथा च **वक्ष्यति** -

त्रैलोक्यसौभगमिदञ्च निरीक्ष्य रूपं
यद्गोद्विजद्रुममृगाः पुलकान्यबिभ्रन् ॥ इति ।

दुर्वाससा च **'आत्मवत् त्वं सर्वप्राणिनां प्रियो भव'** - इति वरो दत्त - इति **शान्तिपर्वणि दानधर्मेषु** पठ्यते ।

सन्निसर्षविप्रकर्षाभ्यां रतिभावोत्पत्तिः

प्रेमाख्यस्य रतिभावस्योत्पत्तौ कारणमाह - **अन्वयादितरतश्चेति** । **अन्वयः** = सन्निकर्ष, **इतरो** = विप्रकर्षश्चेति , ताभ्याम् । तथा च **वक्ष्यति** -

गोपानां परमानन्द आसीद्गोविन्ददर्शने ।
क्षणं युगशतमिव यासां येन विनाऽभवत् ॥

इति ।

यर्ह्यम्बुजाक्षापससार भो भवान्कुरून्मधून्वाऽथ सुहृद्दिदृक्षया ।
तत्राब्दकोटिप्रतिमः क्षणोऽभवद्रविं विनाक्ष्णोरिव नस्तवाच्युत ॥

इति ।

तथा सन्निकर्षविप्रकर्षाभ्यां ज्ञायमानो रतिभावस्स्थायी , तद्विषयः श्रीकृष्णो भक्तिरसावलम्बनं विभाव इत्यर्थः । **विस्तरेण चैतद्वक्ष्यते** ।

ईश्वरस्य सर्वज्ञसर्वशिक्तित्वेन तस्मिन्प्रेमा न निरर्थकः

ननु तस्मिञ्जायमानोऽपि प्रेमा निरर्थकः । तेनाज्ञानात् । राजादिषु प्रेमापरिज्ञानेन विपरीतकार्यस्यापि दर्शनादिति ।

अत आह - **अर्थेष्वभिज्ञ** इति। **सर्वेष्वर्थेषु** मनोवृत्त्यादिरूपेष्व**भि** = सर्वप्रकारेण **ज्ञः**। एवञ्च सार्वज्ञ्यान्नास्त्ययत्नकृतं वैयर्थ्यम्।

प्रेमपरिज्ञानेऽपि तदाश्रयजनोपकारासामर्थ्यमाशङ्क्याह - **स्वराडिति**। स्वतन्त्रस्सर्वशक्तिरित्यर्थः। शक्तिह्रासे हि पारतन्त्र्यं स्यात्। तथा च नासामर्थ्यकृतं वैयर्थ्यम्।

विरिञ्चये सत्यज्ञानादिनिजरूपप्रदर्शनम्

ननु गोपालकस्य कथं सर्वज्ञत्वं सर्वशक्तित्वञ्चेति।

अत आह - **तेने ब्रह्म हृदा य आदिकवय** इति। **आदिकवये** = ब्रह्मणे वत्साहरणद्वारा स्वरूपजिज्ञासवे। **ब्रह्म** = निजरूपं सत्यज्ञानादिलक्षणं सर्वशक्ति च। **यस्तेने** = विस्तारितवान्प्रदर्शितवान्। तदपि **हृदा** = सङ्कल्पमात्रेणैवेत्यर्थः। तथा च वक्ष्यति –

तत्रोद्वहत्पशुपवंशशिशुत्वनाट्यं
ब्रह्माद्वयं परमनन्तमगाधबोधम् ।
वत्सान्सखीनिव पुरा परितो विचिन्व-
देकं सपाणिकवलं परमेष्ठ्यचष्ट ॥

इत्यादि।

भगवन्मायायाः सर्वमोहकत्वम्

ननु ब्रह्मा स्वयमेव जानाति, सर्वज्ञत्वात्; किं तदनुज्ञापनेनेति।

अत आह - **मुह्यन्ति यत्सूरय** इति। **यत्** = यत्र श्रीकृष्णस्वरूपे। **सूरयो** = ब्रह्मादयः। **मुह्यन्ति** = 'इदमित्थम्' - इति निश्चयं कर्तुं न शक्नुवन्ति, तन्मायायास्सर्वमोहकत्वात्। तथा च **भगवतोक्तं गीतासु** -

नाहं प्रकाशस्सर्वस्य योगमायासमावृतः।
मूढोऽयं नाभिजानाति लोको मामजमव्ययम्॥

इति।

ब्रह्मणा वत्सगोपालाद्यपहरणे भगवता पुनः तेषां सर्जनम्

ब्रह्मणो मोहे हेत्वन्तरं वदन्कारुणिकत्वं दर्शयति - **तेजोवारिमृदा-मित्यादिना** । ब्रह्मणा वत्सेषु तत्पालकेषु तदुपकरणशिक्यादिषु च स्वसृष्टेषु भौतिकेष्वपहृतेषु **यत्र** = श्रीकृष्णे **त्रिसर्गः** = त्रयाणां वत्स-तत्पालकतदुपकरणानां **सर्गः** = प्रादुर्भावः । जात इति **शेषः** । तत्र दृष्टान्तः **तेजोवारिमृदां यथा विनिमय** इति । **त्रिवृत्कृतो भू(कृतभू)तारब्धो यथा** ब्रह्मणा कृतो वत्सतत्पालकतदुपकरणरूपः **सर्गस्तथैव** भगवता कृतः । सच्चिदानन्दस्वरूपत्वेनाभौतिकोऽपि भौतिकवद्दृश्यत - इत्यर्थः । तथा च वक्ष्यति -

एवमेतेषु भेदेषु चिरं ध्यात्वा स आत्मभूः ।
'सत्याः के, कतरे ने'-ति ज्ञातुं नेष्टे कथञ्चन ॥

इति ।

तथा च 'के मया सृष्टा भौतिकाः, के च भगवता सृष्टा अभौतिका' - इति निर्णयासामर्थ्ये च ब्रह्मणो मोहो युक्त - इत्यर्थः ।

ब्रह्मणः सन्तोषाय तदपहृतानामनानयनम्

ननु भगवता किमित्यन्ये सृष्टा, ब्रह्मणा कृतानामेवानेतुं शक्यत्वादिति । अत आह - **मृषेति** । मर्षणं **मृषा** । सहिष्णुतारूपा क्षमेत्यर्थः । **मृष क्षमायामिति स्मरणात्** । तथा च वक्ष्यति -

ततः कृष्णो मुदं कर्त्तुं तन्मातृणाञ्च कस्य च ।
उभयायितमात्मानं चक्रे विश्वकृदीश्वरः ॥

इति ।

'तेषामानयने ब्रह्मणोऽसन्मो(तो)षः, तदन्येषां तत्तुल्यानां करणे तद्बन्धूनाम्' - इति विचार्य, परमकारुणिकेन भगवताऽन्ये सृष्टा इत्यर्थः ।

ईश्वरस्यात्मरूपत्वेन ब्रह्मापराधसहिष्णुत्वम्

ननु महामायेन ब्रह्मणा विहितां मायां कथं कृष्णो ज्ञातवान्, ज्ञात्वा च किमिति क्षन्तवान्, एतादृशेऽपराधे कोपस्योचितत्वात् – इत्याशङ्क्याह - **धाम्ना स्वेन सदानिरस्तकुहकमिति** ।

निरस्तं = नितरां निराकृतं **कुहकं** = कपटं ब्रह्मणा कृतं मोहनं तन्निमित्तकोपादिकञ्च येनेति तथा, तम्। तत्र हेतुः - **धाम्ना स्वेन सदेति**। स्वरूपेणात्मतत्त्वेन इनरूपेण प्रभुत्वेन सर्वनियामकत्वेन सदनं सत् अवस्थानं **स्वेन** सत्तया **धाम्ना** तद्रूपेण प्रभावेणेत्यर्थः।

तथा चान्तर्यामित्वात् परिज्ञानमात्मत्वाच्च क्रोधाभाव इति सर्वमनवद्यम्।

श्रीकृष्णस्य भक्तिरसावलम्बनत्वेन ग्रन्थप्रतिपाद्यत्वम्

एवञ्च सर्वप्रियत्वेन परमानन्दरूपस्सर्वज्ञस्सर्वशक्तिस्सर्वमोहनः सर्वसुखप्रदस्सर्वापराधसहिष्णुस्सर्वात्मा परमकारुणिको विदग्धतरश्च श्रीकृष्णो भक्तिरसालम्बनत्वेन सम्पूर्णग्रन्थप्रतिपाद्य इति ध्वनितम्। विशेषणद्वारा विशेष्योपस्थितिश्चालङ्कारिकाय रोचतेतराम्। साक्षादनभिधानञ्चातिरहस्यत्वात्। अर्थभेदः कथञ्चन प्रतिपत्तॄणां विचित्रप्रज्ञानां विनोदायेत्यलमतिविस्तरेण। भक्तिरसानुभवप्रकारश्च सर्वोऽप्यस्माभिर्**भक्तिरसायने**ऽभिहितः। अत्रापि कियान् वक्ष्यते॥१॥

॥ इति श्रीमधुसूदनसरस्वतीकृता श्रीमद्भागवतस्यादिमश्लोकस्य व्याख्या ॥

अनुदिनमिदमायुस्सर्वदाऽसत्प्रसङ्गैः
बहुविधपरितापैः क्षीयते व्यर्थमेव ।
हरिचरितसुधाभिस्सिच्यमानं तदेतत्
क्षणमपि सफलं स्यादित्ययं मे श्रमोऽत्र ॥

सर्वदा चलने वाले असत्प्रसङ्गों से और बहुविध परितापों से यह आयु प्रतिदिन व्यर्थ ही क्षीण हो रही है। श्रीहरि के चरित , जो सुधा के समान हैं , उनसे सिच्यमान यह क्षणमात्र भी सफल हो जाये – इसलिये मैं यहाँ यह श्रम कर रहा हूँ ॥

Pothi.com